pu 2503

P/Th 11766

# *ŚRĪ HARIVĀKYASUDHĀSINDHU* OF ŚRĪ ŚATĀNANDA MUNI - A CRITICAL STUDY WITH REFERENCE TO THE ORIGINAL STRUCTURE OF THE PHILOSOPHY OF LORD SWĀMINĀRĀYAṆA AS REFLECTED IN *VACANĀMṚTAM*

**THE THESIS**
SUBMITTED TO
THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
FOR THE DEGREE OF
**DOCTOR OF PHILOSOPHY**
(Sanskrit)

BY
**JYOTINDRA M. DAVE**

**GUIDED BY**
**PROF. DR. R. I. NANAVATI**
EX-DIRECTOR
ORIENTAL INSTITUTE, M.S.U., BARODA

**DEPARTMENT OF SANSKRIT,**
**PALI & PRAKRIT, FACULTY OF ARTS**
**THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA,**
**VADODARA**

1
P/Th
11766

[library stamp]

# *ŚRĪ HARIVĀKYASUDHĀSINDHU*
# OF ŚRĪ ŚATĀNANDA MUNI -
## A CRITICAL STUDY WITH REFERENCE TO THE ORIGINAL STRUCTURE OF THE PHILOSOPHY OF LORD SWĀMINĀRĀYAṆA AS REFLECTED IN *VACANĀMṚTAM*

**THE THESIS**
SUBMITTED TO
THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
FOR THE DEGREE OF
**DOCTOR OF PHILOSOPHY**
(Sanskrit)

BY
**JYOTINDRA M. DAVE**

**GUIDED BY**
**PROF. DR. R. I. NANAVATI**
EX-DIRECTOR
ORIENTAL INSTITUTE, M.S.U., BARODA

**DEPARTMENT OF SANSKRIT,**
**PALI & PRAKRIT, FACULTY OF ARTS**
**THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA,**
**VADODARA**


## ॥ श्रीअक्षरपुरुषोत्तम महाराज ॥



हेतुः सर्वावताराणां सोऽवतार्य्येव वर्तते। इति ज्ञेयो न चैवान्यैरवतारैः समो हरिः॥
तस्मिन्नेव ततः प्रीतिः कर्तव्या सुदृढा सदा। तयैव संसृतेर्मोक्षः सर्वेषामस्ति नान्यथा ॥
श्रीहरिवाक्यसुधासिन्धुः १४२/१४-१५


गुणातीतोऽक्षरं ब्रह्म भगवान् पुरुषोत्तमः। जनो जानन्निदं सत्यं मुच्यते भवबन्धनात्॥

प्रकट ब्रह्मस्वरूप प्रमुखस्वामी महाराज
अध्यक्ष : बोचासणवासी श्री अक्षरपुरुषोत्तम स्वामिनारायण संस्था



शास्त्रेष्वत्र शुभाक्षरस्य बहुधा सम्प्राप्यते वर्णनम्
यत् विद्वत्सुधिभिः पुरा भगवतः श्री स्वामिनारायणात्।
सम्यक् मूर्तिमिवात्र दर्शनगृहे नोद्घाटितं तत्खलु
भूमौ सञ्चरते हरिं धृतवते तस्मै नमः स्वामिने॥

# ॥ श्रीहरिवाक्यसुधासिन्धुः ॥



## वचनामृतसाररूपाः श्लोकाः

मुक्तानन्दश्च गोपालानन्दो मुनिरुदारधीः। नित्यानन्दशुकानन्दौ चत्वारो मुनयस्तु ये ॥ १ ॥

एतैः सङ्कल्य लिखितानीत्थं धर्मजनेर्हरेः । वचोऽमृतानि सर्वाणि यथामति यथाश्रुतम् ॥ २ ॥

तत्रादौ दुर्गनगरे स्वामिनोक्तानि तेन तु। अष्टसप्ततिसङ्ख्यानि तानि सन्तीष्टदानि हि॥ ३ ॥

प्रोक्तानि च ततस्तेन सारङ्गपुरसञ्ज्ञके। ग्रामेऽष्टादशसङ्ख्यानि तानीष्टानि भवन्ति हि ॥ ४ ॥

तेनोक्तानि ततस्तानि ग्रामे कार्यायनाभिधे। सन्ति द्वादशसङ्ख्यानि सर्वसौख्यकराणि हि ॥ ५ ॥

लौहाभिधे ततो ग्रामे तानि प्रोक्तानि तेन च। सन्त्यष्टादशसङ्ख्यानि भक्ताभीष्टप्रदानि हि ॥ ६ ॥

ग्रामे पञ्चालसंज्ञेऽथ तेन तान्युदितानि वै। सन्त्यैकान्तिकभक्तानां प्रेष्ठानि सप्तसङ्ख्यया ॥ ७ ॥

पुनर्दुर्गपुरे तेन स्वामिना कथितान्यथ। सन्ति तानि सप्तषष्टिसङ्ख्यातानि हि तत्त्वतः ॥ ८ ॥

ततो वृत्तालयपुरे तेन धर्मसुतेन च । तानि विंशतिसङ्ख्यानि कथितानि भवन्ति हि ॥ ९ ॥

ततः श्रीनगरे तानि प्रोक्तानि त्रीणि तेन च । श्रीभक्तिधर्मपुत्रेण सन्ति भक्तप्रियाणि हि ॥ १० ॥

कथितानि पुनस्तेन स्वामिना दुर्गपत्तने । तानि सन्त्येकोनचत्वारिंशत्सङ्ख्यानि तत्त्वतः ॥ ११ ॥

एवं हि तानि सर्वाणि मितानि द्विरसाक्षिभिः । सन्ति संलिखितानि श्रीमहाराजनिदेशतः ॥ १२ ॥

तेषां वचोऽमृतानां तु निदेशाद् भक्तिजन्मनः। शतानन्देन भावार्थः सुधासिन्ध्विति नामतः ॥ १३ ॥

सुरवाण्यां प्रमोदार्थं विदुषां भक्तिवृद्धये । अनूदितस्तमुद्दिश्य शोधबन्धो विरच्यते॥ १४ ॥